Postal Regd.No. GAMC- 1553/2022-2024
ISSN 2454-6313

संस्कृत-
साम्प्रतम्
(Sampratam means "Current")
(संस्कृतमासिकी पत्रिका)
वर्ष : १७ अङ्क : १९९
डिसेम्बर - २०२२

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### यत्र रज्जुः सर्पायते

मध्याह्नकालीनः सूर्यः ललाटं तापयति। अतः एव सः 'ललाटन्तपः' अपि कथ्यते। परन्तु उद्याने विहरतः मम एषा स्थितिः उद्वेगकरी नास्ति। उभयतः विद्यमानाः वृक्षाः परोपकाराय सर्वथा सज्जाः दृश्यन्ते। वृक्षाणां छाया सज्जनानाम् आशीः इव नितराम् आश्वासिका भवति। अत्रान्तरे काचित् अपरिचिता पक्षिणी किमपि गायति। अहं सहसा विरमामि। तया कृतं निमन्त्रणम् अहं सादरं स्वीकरोमि।

कश्चित् सज्जनः मया सह वर्तते। सः मम मौनं सोढुम् अशक्तः इव मां पृच्छति – 'क्रोधः कथं जेतव्यः ?' एषः प्रश्नः मनुष्यम् आदिकालात् पीडयति। प्रश्नः पुरातनः अस्ति, किन्तु नूतनम् उत्तरं दुर्लभम् अस्ति। अस्माकं धर्मगुरवः उपायं दर्शयन्ति, तथापि समाधानं नास्ति। वस्तुतः एतस्मिन् प्रश्ने एव काचित् क्षतिः अस्ति। मनुष्यः ज्ञातुं प्रयत्नं न करोति। यः पृच्छति सः क्रोधं न जानाति। एतत् अज्ञानम् एव पराजयः अस्ति। मनुष्यः जानाति चेत् विजयः स्पष्टः अस्ति। परन्तु यदा क्रोधः पराकाष्ठां प्राप्नोति तदा मनुष्यः स्वयं मूर्च्छितः (विसञ्ज्ञः) भवति। यस्य सञ्ज्ञा एव नास्ति, सः विकारं ज्ञातुं कथं शक्नुयात् ? अपि च यदा क्रोधः शान्तः भवति तदा सः मनुष्यः पश्चात्तापं करोति। तत् कार्यं वृथा एव। वस्तुतः क्रुद्धः जनः सावधानः भूत्वा क्रोधं द्रष्टुं ज्ञातुं वा प्रयत्नं करोति चेत्, क्रोधः स्थातुं न शक्नोति। सः स्वयमेव पलायते।

सम्यक् स्मृतिः अथवा सम्यक् जागरणं मनुष्यं भ्रमात् बहिः आनयति। तदा जयस्य पराजयस्य वा कल्पना मूलात् समाप्तिं गच्छति। शत्रुः एव न तिष्ठति। तत्र कुतः जयः ? कुतः पराजयः ?

अस्मिन् विषये काचित् प्रसिद्धा कथा स्मरणीया। अन्धकारे भूमौ विद्यमाना रज्जुः सर्पः इव दृश्यते। कश्चित् जनः सर्पं मत्वा पलायते। कश्चन वा तेन सह योद्धुं सन्नद्धः भवति। अत्र उभौ अपि जनौ भ्रान्तौ स्तः। यतो हि उभावपि एषः सर्पः इति चिन्तयतः। कश्चित् अपरः जनः निकटं गत्वा पश्यति, तदा जानाति यत् तत्त्वतः सर्पः नास्ति।

अस्माभिः अपि आत्मनः निकटं गन्तव्यम्। यत् समीपे वर्तते तस्य केवलं परिचयः कर्तव्यः। ततः युद्धेन विना हि विजयः स्वयम् उपतिष्ठते। स्वचित्तं प्रति सम्यक् जागरणं हि विजयस्य सूत्रम् अस्ति।

## महालक्ष्मीस्वरूपा श्वश्रूः



विवाहानन्तरं सुनीता यदा पतिगृहं प्रति प्रस्थिता तदा तस्याः माता तां बोधितवती –''इतः परं श्वश्रूः एव भवत्याः माता। दैवते इव तस्याम् आदरः करणीयः भवत्या'' इति।

पतिगृहम् आगता सुनीता मातुः वचनम् अक्षरशः पालितवती। तस्मात् श्वश्रूः पद्मावती तस्याः विषये नितरां सन्तुष्टा। पद्मावती रमणीयतया गृहम् अलङ्करोति स्म। तस्याः पाकः अपि स्वादुः भवति स्म। उत्तमा गायिका अपि आसीत् सा। सुनीता ततः बहून् अंशान् ज्ञातवती। कदाचित् सा श्वश्रूम् उक्तवती – ''आर्ये! भवती महालक्ष्मीः इव अस्ति। विद्याभिः तु सरस्वती एव स्वयम्। मम माता भवत्या ज्ञातान् बहून् अंशान् न जानाति। यदि भवत्याः स्नुषात्वं मया प्राप्तं न स्यात् तर्हि अहं कूपमण्डूकी एव अभविष्यम्'' इति।

तदा पद्मावती अवदत् – ''भवत्याः माता किं जानाति, किं न जानाति इति अहं न जानामि। किन्तु एतत् तु सत्यं यत् सा भवत्यां सद्गुणान् उत्पादितवती इति। सद्गुणाः एव सर्वाभ्यः विद्याभ्यः श्रेष्ठाः'' इति।

ततः अल्पे एव काले सुनीतायाः पत्या राघवेण राजास्थाने उत्तमः उद्योगः प्राप्तः। उत्तमं वेतनम्, उन्नतं स्थानं च प्राप्तं तेन। अतः पद्मावती सर्वान् अवदत् यत् मम स्नुषायाः प्रवेशात् एव एतत् सम्पन्नम् इति।

पत्या सह राजधानीं प्रति प्रस्थितवती सुनीता श्वश्रूम् उक्तवती – ''आर्ये, महालक्ष्मीस्वरूपायाः भवत्याः दर्शनम् इतः परं प्रतिदिनं मम यत् न भविष्यति तत् तु महतः दौर्भाग्यस्य विषयः'' इति।

चत्वारि वर्षाणि अतीतानि। राजधानीं प्रति गमनस्य अनन्तरवर्षे एव सुनीता पुत्रीं प्रसूतवती। कार्यगौरवकारणतः अनुजस्य गणपतेः विवाहावसरे राघवः उपस्थातुं न शक्तवान्।

गणपतेः पत्नी तपती रूक्षस्वभावा। पद्मावती ज्येष्ठस्नुषां सदा प्रशंसति स्म। एतत् असहमाना तपती कदाचित् श्वश्रूम् उक्तवती – ''दूरतः पर्वतो रम्यः। या पूर्वं भवतीं लक्ष्मीं सरस्वतीं च कथयति स्म सा इदानीं न जाने भवत्याः विषये किं किं वदन्ती स्यात्" इति।

ज्येष्ठायाः स्नुषायाः व्यवहारः इदानीं कथं स्यात् इति ज्ञातव्यम् इति इच्छा पद्मावत्याः अपि आसीत् एव। अतः सा पतिं सानुरोधम् अवदत् – ''आर्य, वयं सर्वे राजधानीं गत्वा आगच्छाम'' इति। तस्याः पत्या एतत् अङ्गीकृतम्। अनुकूले दिने सर्वे नगरं गतवन्तः राघवः तान् सहर्षं स्वागतीकृत्य गृहं नीतवान्।

राघवस्य पुत्री निर्मला षड्वर्षीया। सा गृहम् आगतस्य एकैकस्य अपि परिचयं प्राप्तवती। पद्मावती एव पितामही इति यदा ज्ञातं तदा सा उक्तवती – ''अहो! भवती एव मम पितामही!! मम मातुः कथनस्य अनुगुणम् अहं चिन्तितवती आसं यत् भवती स्थूला, कृष्णवर्णीया, वामना च स्यात् इति। भवती तु कृषा, सुन्दरी, देवीतुल्या च

दृश्यते'' इति।

एतस्य श्रवणात् पद्मावत्याः मुखं विच्छायं जातम्। तपती विजयगर्वयुक्तं हासं प्रदर्शयन्ती श्वश्रूमुखं दृष्टवती।

पुत्र्याः वचनं श्रुत्वा सुनीता अपि क्षणकालं दिग्भ्रान्ता। क्षणानन्तरं सा हसितवती। राघवः अपि अहसत्। तत्र उपस्थितेषु कोऽपि न ज्ञातवान् यत् एतौ किमर्थं हसतः इति। तावता पाकशालातः आगता पाचिका अवदत् – ''आर्ये! पाकः सज्जः'' इति। सा पाचिका कृष्णवर्णीया, वामना, स्थूला च आसीत्। ''एतावच्छीघ्रं पाकः सज्जः एव! अहो, कौशलं भवत्याः! भवती साक्षात् अन्नपूर्णा एव। महालक्ष्मीस्वरूपा अस्ति भवती'' इति वदन्ती सुनीता तस्याः प्रशंसाम् अकरोत्।

एतत् श्रुतवन्तः पद्मावतीप्रभृतयः सर्वे अवगतवन्तः यत् लघुबालिकायाः निर्मलायाः वचनस्य किम् आन्तर्यम् इति। ''भवती महाबुद्धिमती वत्से!'' इति वदन्ती पद्मावती ताम् उन्नीय प्रीत्या आलिङ्गितवती, सशब्दम् अचुम्बत् च।

## विनयस्य पाण्डित्यम्

वेणुशर्मा प्रसिद्धः वैद्यः। सः न केवलं स्वग्रामे, अपि तु परितः स्थितेषु ग्रामेषु अपि प्रसिद्धः एव। तस्य चिकित्सापद्धतिं सर्वेऽपि मुक्तकण्ठं प्रशंसन्ति स्म। कदाचित् सः वैद्यः रोगिणां परीक्षां कृत्वा तेभ्यः स्वास्थ्यसम्बन्द्धाः सूचनाः दत्त्वा तान् सम्प्रेष्य गृहस्य अन्तः गन्तुम् उद्युक्तः। तावता विंशतिवर्षीयः कश्चन युवकः आगतः। सः वैद्यं विनयपूर्वकं नमस्कृतवान्।

वेणुशर्मा चिन्तितवान् यत् एषः युवकः केनापि रोगेण पीडितः स्यात् इति। अतः तं श्रोतुं सः उद्युक्तः। तावति काले स युवकः – ''मम नाम विनयः इति। गतेभ्यः आ दशभ्यः वर्षेभ्यः अहं वैद्यानां सेवां कुर्वन् अस्मि। वैद्यसम्बद्धानि शास्त्राणि अपि पठितवान् अस्मि। इदानीं भवतः सेवां कुर्वन् वैद्यः सन् रोगिणां चिकित्सां कर्तुम् इच्छामि। कृपया भवतः अनुमतिः आशीर्वादश्च अपेक्ष्यते'' इति उक्तवान्।

युवकस्य वचनेन वेणुशर्मा ज्ञातवान् यत् एतस्मिन् युवके विद्यातः अपि गर्वः एव अधिकः इति। अतः सः तं युवकम् उक्तवान् – ''मम सेवां भवान् यदाकदाचिदपि कर्तुम् अर्हति। इदमिदानीं मया काचन वार्ता श्रुता शरभनामकः स्वगृहस्य पृष्ठभागे स्थितस्य वृक्षस्य शाखानां कर्तनसमये स्वहस्तमपि कर्तितवान्, तस्य चिकित्सा शीघ्रमेव करणीया इति। वदतु भवान्, इदानीं किं करणीयम्?'' इति।

तदा विनयः भीतः सन् – ''सर्वे ग्रन्थाः अतिथिगृहे स्थापिताः। एतादृशी दुर्घटना यदि जायेत तर्हि किं करणीयम् इति चरकग्रन्थे सुश्रुतग्रन्थे वा लिखितं स्यात्। अहं परिशील्य आगच्छामि'' इति वदन् ततः प्रस्थितः।

तदा वेणुशर्मा तं निरुन्धन् उक्तवान् – ''भवान् चरकसुश्रुतग्रन्थाध्ययनानन्तरं चिकित्सां करिष्यति चेत् तावता शरभः रक्तस्रावेण परलोकं गमिष्यति। अतः भवान् इतोऽपि कञ्चित् कालं ग्रन्थानाम् अध्ययने एव गभीरं प्रयासं करोतु'' इति।

## ग्रन्थपरिचयः ( मध्यमव्यायोगः )

व्योम शाहः

नाट्यसृष्टौ यस्य नाममात्रेण विभाताम् अपि अशेषकविसाहित्यानां तेजः अपक्षीयते, तस्य महाकविभासस्य नाटकचक्राद् अस्मिन् अवसरे 'मध्यमव्यायोगः' इति नामधेयस्य नाट्यस्य रसास्वदनं कुर्मः।

**कृतिप्रकारपरिचयः** –रूपकभेदेषु इयं कृतिः 'व्यायोगः' इति भेदे अन्तर्भवति। लक्षणं तु पूर्वत्र प्रकाशितम् अपि सङ्क्षेपेण उच्यते – अस्मिन् एकः एव अङ्कः भवति, वृत्तान्तम् इतिवृत्तरूपेण संवलितं, नायकः धीरोद्धतः, पुरुषपात्राणां बाहुल्यं हास्यशान्तरसौ च गौणौ।

**मूलस्त्रोतः** –पितापुत्रयोः इत्थं मेलनस्य प्रसङ्गः महाभारते न वर्तते । इयं कवेः एव कल्पना । तथापि मध्यमस्य ब्राह्मणपुत्रस्य समर्पणस्य प्रसङ्गः ऐतरेयब्राह्मणे वर्णितः। महाभारते तु सर्वेऽपि पाण्डवाः यज्ञार्थं गताः सन्ति अतः नास्ति अस्य प्रसङ्गस्य अवकाशः।

**पात्राणि** – भीमः, घटोत्कचः, ब्राह्मणः, तस्य त्रयः पुत्राः पत्नी च, हिडिम्बा

**शीर्षकस्य अर्थः** –विद्वद्भिः शीर्षकस्य त्रिधा विग्रहः कृतः। तेषु अन्तिमः योग्यतमः। (क) मध्यमं (भीमं मध्यमं ब्राह्मणपुत्रं वा) अधिकृत्य कृतः व्यायोगः। (ख) मध्यमस्य (भीमस्य) (हिडिम्बया सह) व्यायोगः (विशिष्टः संयोगः)। (ग) मध्यमौ व्यायुज्येते अस्मिन् इति।

**व्यायोगसारः** – सूत्रधारः आदौ श्रीविष्णोः स्तुत्या मङ्गलं तनोति । कश्चित् ब्राह्मणपरिवारः घटोत्कचेन त्रस्यतः इति उक्त्या स्थापनां कृत्वा निर्गच्छति । युधिष्ठिरेण प्रतिष्ठितस्य कुरुजाङ्गलस्य यूपग्रामस्य वास्तव्यः केशवदासनामा ब्राह्मणः स्वमातुलस्य यज्ञबन्धोः पुत्रस्य उपनयनसंस्कारार्थं सपरिवारः गन्तुं प्रस्थितः । सः भार्यया पुत्रत्रयेण च सह हिडिम्बावनमार्गेण गच्छति स्म।

इतश्च हिडिम्बायाः उपवासः सम्पन्नः। सा पारणा–अवसरे पुत्रं घटोत्कचं कञ्चन मनुष्यम् आनेतुं प्रेषितवती। मातुः क्षुधायाः सन्तुष्ट्यर्थं सः पुष्टं युवानं वने मृगयते स्म। तत्र सः सपरिवारं प्रस्थितं वृद्धब्राह्मणं दृष्टवान्।

अग्रे गच्छतः तान् सर्वान् तत्रैव स्थातुं सः आदिशत्। यावत् सः समीपम् आगच्छति स्म, तावता कालेन सर्वे तस्य राक्षसपुत्रस्य वपुषः तेजसश्च वर्णनम् अकुर्वन् । 'लोकेऽस्मिन् ब्राह्मणाः पूज्यतमाः इति जानामि किन्तु मातुः आदेशवशाद् मया इदम् अकार्यं कर्तव्यम्।' इति चिन्तयन् सोऽपि वृद्धब्राह्मणस्य निकटम् आगतवान्।

पाण्डवानाम् उपस्थितिविषये ब्राह्मणाः मिथः चर्चाम् अकुर्वन् । ज्येष्ठेन पुत्रेण उक्तं यत् सर्वे यज्ञार्थं धौम्यमुनेः आश्रमं गताः किन्तु अत्र मध्यमः पाण्डवः आश्रमपरिपालनार्थं स्थापितः। घटोत्कचः वृद्धं ब्राह्मणं प्रति गत्वा स्वकीय–मातुः आदेशं प्रकटयति। सः पुत्रत्रये एकं पुत्रं समर्पयितुम् अपि कथयति। 'न दास्यामि' इति ब्राह्मणं निश्चये दृढं विज्ञाय सः तं तर्जयति यद् अन्यथा सः सपरिवारः मृत्युं प्राप्स्यति। भीतः ब्राह्मणः आत्मानं समर्पयितुं घटोत्कचाय निवेदयति किन्तु ब्राह्मणी तं तथाकरणाद् वारयति। इदानीं त्रयोऽपि पुत्राः आत्मानं समर्पयितुम् उद्यताः सञ्जाताः।

**(क्रमशः... )**

# मासवार्ता

## आरब्धौ संस्कृतभाषाशिक्षणस्य वर्गौ




संस्कृतं पठितुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमी संस्कृतभाषाशिक्षणस्य वर्गाणां नियतम् आयोजनं करोति। एतस्मिन् एव उपक्रमे नवेम्बरमासस्य ७ दिनाङ्कतः संस्कृतभाषाशिक्षणस्य प्रथमस्तरस्य द्वितीयस्तरस्य च आरम्भः जातः वर्तते। संस्कृतभाषाशिक्षणस्य प्रथमस्तरस्य समयः सायं ६:३० तः ८:०० वर्तते। अस्मिन् संस्थानेन online एवं च offline मिलित्वा छात्राः पठितुं शक्नुयुः तथा व्यवस्था कृता वर्तते। संस्कृतभाषाशिक्षणस्य द्वितीयस्तरः प्रातः ७:०० तः ८:३० पर्यन्तं प्रचलति। उभयोः वर्गयोः आहत्य २७ छात्राः प्रवेशं स्वीकृतवन्तः। एतौ वर्गौ फरवरीमासपर्यन्तं प्रचलिष्यतः।

## आरब्धा पुराणव्याख्यानमाला

संस्कृतरसिकाः संस्कृतसाहित्यस्य शास्त्राणां च परिचयं प्राप्नुयुः इति विचार्य एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानं चेरिटेबलट्रस्ट, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः आयोजनं नियतं क्रियते। एतस्मिन् एव उपक्रमे संस्थानैः पुराणव्याख्यानमाला आरब्धा वर्तते। आयोजनेस्मिन् १८ पुराणानि स्वीकृत्य विद्वांसः मार्गदर्शनं करिष्यन्ति। अस्यां व्याख्यानश्रेण्यां नवेम्बरमासस्य २६ दिनाङ्के श्री सहदेवः जोषी (प्राध्यापकः, श्रीबाबडेश्वर-संस्कृत-महाविद्यालयः) 'ब्रह्मपुराणम्' इति विषये व्याख्यानं प्रायच्छत्। व्याख्यानं श्रुत्वा संस्कृतरसिकाः प्रसन्नाः आसन्।

## सम्पन्ना कार्यशाला

संस्कृतस्य छात्राः शिक्षकाश्च अध्ययन-अध्यापन-समये संशयं निवारयितुं व्याकरणग्रन्थानां कोषग्रन्थानां टीकाग्रन्थानां च साहाय्यम् अपेक्षन्ते। एते ग्रन्थाः सर्वदा समीपे न विद्यन्ते। तर्हि आन्तरजालीयतन्त्राणाम् अपेक्षा भवति। यतो हि आन्तरजाले बहूनि तन्त्राणि सज्जीकृतानि वर्तन्ते। किन्तु तेषां तन्त्राणाम् उपयोगः कथं करणीयः ? सङ्गणके संस्कृतस्य टङ्कणं कथं कर्तव्यम् ? इत्येताः समस्याः अपाकर्तुम् एकलव्य-संस्कृत-एकेडेमी-संस्थानेन 'Workshop on Tech Resources of Sanskrit'इति नामधेयः कश्चित् चतुर्दिवसीयकार्यक्रमः नवेम्बरमासस्य ३० दिनाङ्के, डिसेम्बरमासस्य ०२, ०५, ०७ दिनाङ्के च आयोजितः। अस्मिन् सुश्री जानवी-वाढेरः, व्योम शाहः, श्यामः पटेलः च समागतानां छात्राणां शिक्षकाणां च मार्गदर्शनम् अकुर्वन्।

## कृपया हसन्तु

**रमा - (मीनाम् उद्दिश्य) भवत्या: प्रिय: लेखक: क: अस्ति ?**

**मीना - मम पति: ।**

**रमा - शोभनम् । स: किं लिखति ?**

**मीना - स: धनादेशं लिखति ।**

**धनादेश:** - cheque

★ ★ ★ ★ ★

**रमण: - (नमनम् उद्दिश्य) भो: मित्र ! तव विवाहदिनाङ्क: कदा वर्तते ?**

**नमन: - मित्र ! क्षणं प्रतिक्षस्व । सम्प्रति पात्राणि एव क्षालयन् अस्मि । कलशस्य उपरि दिनाङ्क: लिखित: स्यात्, पठित्वा वदामि ।**

★ ★ ★ ★ ★

**सेवक:- (कोपेन) भो: स्वामिन् ! अहं गृहकार्यं त्यजन् अस्मि ।**

**स्वामी - किमर्थम् ? किं जातम् ?**

**सेवक:- भवान् मयि विश्वासं न करोति अत: ।**

**स्वामी - तथा नास्ति । पश्य, अहं मम कपाटिकाया: कुञ्चिका: अपि भवते दत्त्वा एव गच्छामि ।**

**सेवक:- आम् । एतासु एकापि कुञ्चिका कार्यं न करोति । कपाटिकाम् उद्घाट्य स्वयमेव पश्यतु भवान् ।**

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**जातिद्वेषो धर्मनाशो देशद्रोहः स्वविस्मृतिः ।**
**यत्र प्रवर्धते तत्र सङ्घधर्मो हि तारकः ॥**

**तात्पर्यम्** – जातिद्वेषः, धर्मनाशः, देशद्रोहः, आत्मविस्मरणम् – एते यत्र वर्धन्ते तत्र तारकमन्त्रः परिहारमार्गः नाम सङ्घधर्मः एव।

**जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।**
**गुणाधिके पुंसि जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः ॥**

**तात्पर्यम्** – इन्द्रियाणि वशे यदि भवन्ति तर्हि विनयगुणः वर्धते। विनयः यदि स्यात् तर्हि सद्गुणाः वर्धन्ते। सद्गुणैः युक्तं मनुष्यं जनाः इच्छन्ति। जनानां प्रीतिः यदि सम्पाद्यते तर्हि ऐश्वर्यं स्वयमेव प्राप्यते।

**जीवन्तं मृतवन् मन्ये देहिनं धर्मवर्जितम् ।**
**मृतो धर्मेण संयुक्ते दीर्घजीवी न संशयः ॥**

**तात्पर्यम्** – धर्मं परित्यक्तवान् जनः जीवन् अपि मृतः इव। दिवङ्गतः कश्चित् धर्मनिष्ठः यदि स्यात् तर्हि सः भवति दीर्घजीवी एव (यतः सः इहलोके चिरकीर्तिं परलोके शाश्वतं स्वर्गञ्च प्राप्स्यति)।

## ज्ञानसरित्

**श्यामः पटेलः**

**मिष्टान्ने उपयुज्यमानं महार्घं वस्तु – केसरः**

शीतकाले केसरमिश्रितं दुग्धं जनेभ्यः रोचते । मिष्टान्नेषु अपि सर्वत्र केसरस्य सुगन्धः वर्णः स्वादश्च अपेक्षितः भवति । रसालाखाद्ये, क्षीरपाके, पयोहिमे च अयम् अतीव लोकप्रियतां गतः । अतः अद्य केसरस्य विषये किञ्चित् जानीयाम । केसरः कश्चित् औषधीयगुणोपेतः वनस्पतिः अस्ति । केसरस्य पुष्पाणां यदा वयं निरीक्षणं कुर्मः तदा तत्र दृश्यमानाः भवन्ति केसरतन्तवः । ते तन्तवः शुष्कीभूय विपणिषु विक्रीयन्ते । लक्षाधिकेभ्यः पुष्पेभ्यः केसरतन्तूनां सञ्चयं कुर्मः तदा प्रायः अर्धकिलोग्रामपरिमितं केसरं प्राप्तुं शक्नुमः । तथा च यदा तन्तवः शुष्कीभवन्ति तदा तु तेषां भारः इतोऽपि न्यूनीभवति । केसरः शीतप्रदेशे उद्भवति । अस्य कृषिकार्यं बहुषु देशेषु भवति । भारतेऽपि काश्मीरराज्ये उत्तमप्रकारस्य केसरस्य कृषिः भवति इति प्रसिद्धम् । केसरसस्यस्य पर्णानि अतीव लघूनि भवन्ति । केसरस्य पर्णस्य रक्षणार्थं प्रत्येकं पर्णं परितः श्वेतपर्णस्य आच्छादनं भवति । केसरस्य पुष्पाणि बृहन्ति तथा च ईषद् पाटलवर्णीयानि भवन्ति । अस्य सस्यं प्रायशः १ फूटपरिमितं भवति । तथा च प्रत्येकं पुष्पं केवलं त्रीणि केसरतन्तुन् दधाति । अतः एषः अल्पोपलब्धित्वात् औषधत्वाच्च बहुमहार्घः भवति ।

महार्घ – expensive, केसरः – saffron, केसरतन्तुः – thread of saffron

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **नाडिका** | एक घडी (२४ मिनट) | 24 minutes |
| **हुतवहः** | अग्नि | fire |
| **उत्सूरः** | संध्याकाल | evening |
| **नियुद्धम्** | बाहुयुद्ध | fight |
| **आतङ्कः** | रोग | disease |
| **उपेन्द्रः** | श्रीविष्णु | lord Vishnu |
| **हुताशनः** | अग्नि | fire |
| **पतङ्गः** | पक्षी, सूर्य | bird, sun |
| **केलिः** | क्रीडा | play |
| **पांसुः** | धूल | dust, dirt |
| **उपचयः** | वृद्धि | growth |
| **उपदर्शकः** | द्वारपाल | door-keeper |
| **शिरोर्त्तिः** | सर-दर्द | head-ache |
| **सरोरुट्** | पद्म | lotus |
| **सर्कः** | वायु | wind |

## किं भवन्तः जानन्ति ?

**१ ) महर्षिविश्वामित्रस्य क्षत्रियदशायाः नाम किम् आसीत् ?**
(क) चित्ररथः (ख) विश्वरथः (ग) रुक्मरथः (घ) दशरथः

**२ ) एतेषु कस्य हस्तेन कृष्णस्य मृत्युः अभवत् ?**
(क) दारुकस्य (ख) जरायाः (ग) निषधस्य (घ) हिरण्यधनोः

**३ ) लक्ष्मणस्य मूर्छां निवारयितुं हनुमान् एतेषु कं वैद्यं लङ्कातः आनीतवान् ?**
(क) मनोजम् (ख) रैभ्यम् (ग) मातलिम् (घ) सुषेणम्

**४ ) रावणः कं खड्गं शिवात् प्राप्तवान् आसीत् ?**
(क) चन्द्रहासम् (ख) संहारिणम् (ग) विजयिनीम् (ध) सुहासिनीम्

**५ ) श्रीकृष्णस्य शङ्खस्य नाम किम् आसीत् ?**
(क) सुघोषः (ख) सुदर्शनम् (ग) चन्द्रहासः (घ) पाञ्चजन्यः

**६ ) देवतानां श्वानस्य नाम किम् आसीत् ?**
(क) सरमा (ख) मङ्गला (ग) पौर्वी (घ) नन्दा

**७ ) कस्मिन् युगे महाभारतयुद्धं जातम् आसीत् ?**
(क) त्रेतायुगे (ख) सत्ययुगे (ग) कलियुगे (घ) द्वापरयुगे

उत्तराणि – (१) ख (२) ख (३) घ (४) क (५) घ (६) क (७) घ

## अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY

Online/ Offline
**Admission Open**

# संस्कृतभाषाशिक्षणम्

**Third Level**

**Date :** 15/2/23 to 15/5/23
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

EKLAVYA SANSKRIT ACADEMY

Online / Offline
**Admission Open**

# संस्कृतभाषाशिक्षणम्

**First Level**

**Date :** 15/2/23 to 15/5/23
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

# स्तोत्रपाठः

(निश्चतस्तोत्राणि )

**Date :** 3/1/23 to 7/2/23
**Day :** Tuesday-Thursday
**Time :** 6:30pm to 8:00pm (IST)
**Fees :** 2500/-

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

EKLAVYA SANSKRIT ACADEMY

**Online**

# श्रीमद्भगवद्गीता
# Chanting

( अध्याय 5, 6 &7 )
**Class 9 & above**

**Date :** 10/1/23 to 23/2/23
**Day :** Tuesday - Thursday
**Time :** 7:00am to 8:30am (IST)
**Fees :** 3000/-

**contact: Dr Mihir Upadhyay, 98246 16237**

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006